
अमर चित्र कथा

संख्या ८८ रु. ७

SANS-88

गंगा



अद्य गंगां विना भारतस्य कल्पनाम् अपि कर्तुं न शक्यते। परंतु महाभारतं रामायणं च अनुसृत्य एतादृशः अपि कालः व्यतीतः अभवद् यत् तदा एतस्यां पृथिव्यां गंगायाः अस्तित्वमेव नासीत्। प्रायः भगीरथद्वारा गंगा-आनयन-कालपर्यन्तम् गंगायाः अस्तित्वं पृथिव्यां नासीद् इति कथयितुम् अपि शक्यते एव। भगीरथेन स्वपूर्वज-सगरस्य उद्धत-पुत्राणाम् आत्मोद्धारार्थम् एतद् गुरुतरं कार्यं सम्पन्नं कृतम्। सगरपुत्रैः कपिल-ऋषीणाम् अनादरः कृतः आसीत्। अनादर-फलस्वरूपेण ऋषिकोपाग्निना एते सगरपुत्राः भस्मीभूताः जाताः आसन्। अन्तिमसंस्कारैः विना एव एतेषाम् अकाल-मृत्युः। अतः एव एते नरकभागिनः अभवन्। कालान्तरेण कपिल-ऋषिः बोधितः जातः। तदा अनेन भगीरथस्य पितामहः अंशुमान् सम्बोधितः यत् पवित्रस्वर्गंगा अस्याः पावन-तया सह एव पृथिव्योपरि आनेतव्या अस्याः च जलं सगर-पुत्रभस्म स्पृशतु ततः सगरपुत्राणां पापप्रक्षालनं भवितुं च शक्यते। तदा एतेषां स्वर्गप्राप्तिः अपि सम्भवति। (मरणा-सन्नस्य वा मृत्युं गतस्य वा हिन्दोः मुखे गंगाजलसिञ्चनस्य प्रथायाः आधारः अनेन प्रसंगेन जनमान्यतां प्राप्तः स्याद् इत्यपि सम्भवेत्।) अंशुमान् अस्य पुत्रः दिलीपः च अपि गंगां पृथिवीं आनेतुम् असमर्थौ अभवताम्। महाभारतं रामा-यणं च अनुसृत्य एतद् महत्कार्यं स्वस्य अतुल्यनिष्ठया अखण्डसाधनया च भगीरथेन पूर्णं कृतम्।

यद्यपि पौराणिकी-गाथाः पूर्णरूपेण यथार्थतया मान्यतां न गच्छन्ति तथापि एतासां काव्यमय-अतिशयोक्तिषु अपि सत्यतायाः छटाः प्राप्यन्ते एव। सिन्धु-गंगातः दूरस्थः राजस्थानस्य मरुप्रदेशः एवमेव संसूचयति यद् भारत देशे गंगायाः अस्तित्वं नासीद् इति कश्चित् कालः आसीदेव। अनेन सहजतया कल्पनां कर्तुम् अपि शक्यते यत् पावन-गंगाजलाभावेन जनैः कियत्कष्टानि अनुभूतानि यदि एवम् आसीत् तदा भगीरथेन गंगानयनस्य यत्कार्यं कृतं तद् गुरुतरमेव आसीद् इत्यत्र न सन्देहलेशः। तथा च महा-काव्येषु अस्याः वर्णनं गुणगानं च सर्वथा उचितमेव।


संस्कृत-प्रकाशन-माला क्रमाङ्कः ४
विश्वसंस्कृत प्रतिष्ठानम्
इत्यस्य साहाय्येन

संस्कृतानुवादकः
पं. गुलाम दस्तगीर

SANS.88

Published by H.G. Mirchandani, for India Book House Pvt. Ltd. Mahalaxmi Chambers, 22 Bhulabhai Desai Road, Bombay-400 026 and printed by him at Sakal Printers, Prabhadevi, Bombay-400 025.

Editor: Anant Pai




रूपवती, पुनीता, दृढेच्छा-शक्तिशालिनी गंगा पर्वतराज-हिमालयस्य ज्येष्ठा कन्या। स्वसम्पर्के आगच्छत्-प्रत्येक-वस्तु पावनं कर्तुं सक्षमा एषा।

SANS.88


एकस्मिन् दिवसे ब्रह्मदेवस्य नेतृत्वे देवगणाः पर्वतराज हिमालयं प्रति आगताः।
सर्वेभ्यः प्राणिभ्यः पावनताप्रदानार्थं समर्था गंगा स्वर्गार्थम् आवश्यिका।
यदा गंगा निर्गच्छति तदा पृथिव्याः हानिः भविष्यति। मम कर्तव्यं तु लोक-त्रयस्य ध्यानम्।
गंगा स्वच्छंदं कुत्रापि प्रवहति सर्वान् च पावनतां नयति। गंगाप्रेषणार्थम् अहं सिद्धः अस्मि भवद्भिः सह।
अपि अस्माभिः सा अधुनैव नेया?
गंगे, देवैः सह गच्छ भक्तिभावेन च तेषां सेवां कुरु।


तेषु दिनेषु गंगां विना भूलोके सज्जनानां जीवनं दुर्भरम् अभवत्।
अस्माकं यज्ञः अपि स्थगितः। एतादृशी दशा स्यात् तदा देवतानां कोपभाजनपराः एव वयं भविष्यामः।
मासानां कठोर परिश्रमः व्यर्थतां गतः। एकस्यां रात्रौ एव अस्माकं सस्यानि नष्टानि।
लुष्ठकैः अस्माकं बालकाः अपि हृताः अस्माभिः किं आचरितम् ननु?
अन्ते –
गुप्तशत्रूणां पुरतः अस्माकं वशीकरणम् अपि न चलति। शेषजीविताः वयं चलामः गुहासु च प्रच्छन्नाः भवामः।


एते रहस्यमयाः अत्याचारिणः असुराः दिवसे समुद्रे प्रच्छन्नाः भूत्वा रात्रौ बहिरागत्य लोकान् त्रस्तान् कुर्वन्ति स्म।
मया ज्ञातं यत् ते जनाः गुहासु प्रच्छन्नाः।
चिन्ता मा भवतु। तत्रापि तान् अभिधावामः
तेषु एकः अपि न रक्षणीयः।
स्वर्लोके देवगणाः भूलोके संत्रस्तजनानां पीडया चिन्ताक्रान्ताः। तेषां सभा अभवत्।
स्वहितार्थं वयं भूलोकस्थ-सत्पुरुषाणां सहायतां कुर्याम। परं कथम्? भूलोकः केन संत्रस्तः क्रियते इत्यपि अस्माकम् अज्ञानम्।
ब्रह्मदेवेन संसूचितम्-
अस्माभिः विष्णोः साहाय्यं प्रार्थनीयम्। विष्णुः तान् जानीयात्।


ते विष्णुं प्रति गताः।
भगवन्, भूलोके सज्जनानां रहस्यमयाः शत्रवः। तेषां नाशः कथं कार्यः? ते शत्रवः दिने कुत्र प्रच्छन्नाः भवन्ति?
समुद्रतले।
तेषां नाशार्थं समुद्रः शुष्कः करणीयः। अगस्त्यमुनिं प्रति गम्यताम्। अयमेव भवतां सहायदाने समर्थः।
अधुना अगस्त्यमुनि-समीपं गत्वा निवेदनं करणीयम्।


अगस्तमुनिना सर्वा वार्ता श्रुता।
लोककल्याणार्थं भवद्भिः सह चलामि। सर्वं समुद्रजलं च पिबामि।
यदा ते सर्वे समुद्रतीरे आगताः तदा-
अपेक्षितकार्यार्थं सिद्धाः तिष्ठत।
यदा अगस्त्येन समुद्रजलं पातुं प्रारम्भः कृतः तदा दुष्टाः असुराः प्रकटिताः अभवन्।


देवगणाः तान् अभ्याक्रमन्।
घातकाः न रक्षणीयाः।
रक्षत! रक्षत!
असुराः सर्वे पराजिताः तदा देवगणैः अगस्तमुनिः पुनः विज्ञापितः।
हे त्राणकर्तः, अधुना असुराणां नाशः जातः। अतः यद् जलं भवता पीतं तस्य पुनः वमनं भवतु, येन समुद्रः जलपूर्णः भवेद् इति कृपा करणीया।
एतद् कर्तुम् असमर्थः। तस्य जलस्य पचनमपि मया कृतम्। अधुना समुद्रपूरणार्थं अन्यः कः अपि उपायः भवद्भिः संशोधनीयः।
SANS.88



SANS.88




SANS.88





SANS.88







SANS.88


इन्द्रेण बलि-अश्वः निभृतम् अपहृतः।
बलि-अश्वापहरणज्ञानान्ते यज्ञं यजमानाः पुरोहिताः सगरः च ६०००० (षष्टिसहस्रमित) पुत्रान् सम्बोधितवन्तः यत्-
अस्माकं यज्ञः पूर्णः न भवेत् तदा अस्माकं सर्वनाशः एव मन्तव्यः।
वीरपुत्राः! गच्छत, अश्वान्वेषणं कुरुत।
सगरपुत्रैः सर्वा पृथ्वी अपि आक्रान्ता, तथापि अश्वः नैव प्राप्तः। अन्ते-
अधुना एकमेव स्थानम् अवशिष्टं तत् पातालम्।
तथा पृथ्व्यन्तभागं खननमार्गेण गत्वा शोधः करणीयः।



यदा ते पातालं गतवन्तः –
अयं विशालः गजराजः अत्र किं करोति?
एषः पृथ्वीवाहक अष्टदिग्गजेषु एकतमः।
कतिपयसमयः अश्वशोधने व्यतीतः।
अश्वः नैव दृश्यते। अग्रे गच्छामः।
हतबुद्धयः एते राजकुमाराः सर्वनाशम् आह्वयन्ति।
पाताललोके गमनार्थं पृथिव्याः उत्खननं सगरपुत्रैः कृतं तदा भूलोकवासिनः भयभीताः अत्र-तत्र च पलायिताः। पृथ्वीभारसन्तुलनार्थं गजराजः अपि आन्दोलितः चलितः च। भयानकः भूकम्पः अपि प्रादुर्भूतः।



SANS.88



SANS.88


अंशुमान् अश्वं गृहीत्वा प्रत्यागतः।
अस्माकं रक्षा जाता। यज्ञस्य अश्वः प्राप्तः।
अधुना यज्ञः पूर्णतां गच्छति।
अनन्तरं राजमन्दिरे अंशुमान् सगरराजं सर्वं श्रावितवान् यथा महर्षिणा कथितम्।
मम जीवन-काले एतद् गुरुतरकार्यं पूर्णतां गतम्।
अंशुमान् मदन्तरे त्वमेव राजा भवितुम् योग्यः। गंगां पृथ्वीम् आनेतुं त्वया एव प्रयत्नाः कर्तव्याः।
सगरस्य मरणान्ते अंशुमान् राजा बभूव। परं च...
मम पुत्रः दिलीपः राजकार्यं प्रचालयेत्। अहं हिमालये गन्तुकामः। तत्र तपः कृत्वा गंगां पृथ्वीं प्रत्यानेतुं प्रयत्नान् करोमि।


किन्तु अस्य प्रयत्नाः यशस्तां न गताः। अंशुमान् च मृत्युं गतः। पुत्रः दिलीपः शोकाकुलः जातः।
मम शासनकाले गंगां पृथ्वीम् आनेतुं प्रयत्नाः भवन्तु।
अहर्निशं सः स्वपूर्वजभाग्यं तेषाम् आत्ममुक्तिंच चिन्तयति स्म। परम्–
मम शासने बहूनि वर्षाणि व्यतीतानि। परं गंगां पृथ्वीम् आनेतुम् अस-फलः एव।
अन्ते दिलीपः मृत्युशय्यायाम् आसीत्। कार्यं तु अपूर्णमेव। तस्य पुत्रेण भगीरथेन मरणासन्नपितुः समक्षं प्रतिज्ञा कृता।
पितः, गंगां पृथ्वीं आनयनं विना अहं सिंहासने न उपविशामि।


दिलीपे दिवं गते भगीरथः स्वमन्त्रि-गणम् अवदत् -
भवताम् अधिकारे मया राज्यं निक्षिप्यते। पृथिव्यां गंगां प्रवाहितां कृत्वा एव अहं राजपदे भवामि।
अहं वनं गच्छामि! तत्र कठोरतमं तपःआचरामि।
भगीरथेन अनेक - वर्षाणि तपाचरणे ध्यानधारणे च व्यतीतानि।



अन्ते अस्य एकाग्रनिष्ठया प्रसन्नः ब्रह्मा प्रकटः अभवत्।
रे दृढप्रतिज्ञ!. त्वं यथेच्छं वरं वृणीष्व। तद्वरं प्राप्नोषि।
स्वर्गतिः गंगायाः अवतरणं पृथिव्यां भवतु। मम पूर्वजाः आत्ममुक्तिं लभन्ताम्।
तव मनोरथः प्रशंसनीयः। परं गंगायाः प्रचण्डं प्रवाहं धारयितुं पृथिवी अस-मर्था। केवलं शिवः एव गंगां धारयितुं समर्थः।
एवम् उक्त्वा ब्रह्मा अन्तर्धानं गतः।
अहं शिवप्रसादाय तपः करोमि।
भगीरथेन वर्षैकं शिवस्य आरा-धना कृता।



SANS. 88



SANS. 88



SANS.88



SANS.88




SANS.88



SANS.88


भगीरथस्य तपसः विचारं कृत्वा जह्नुना गंगा मुक्ता कृता।
ऋषेः सत्संगेन गंगा पुनरपि पावनतां गता।
भगीरथ! अधुना त्वम् इमां समुद्रं पाताल-लोकं प्रति च निर्विघ्नं नेतुं शक्नोषि। तव पूर्वजानां आत्ममुक्तिं कर्तुं समर्थः असि।


हे पुण्यात्मन्! गंगा अधुना जाह्नवी इत्यपि नामाभिधाना। अर्थात् तव पुत्री।



अन्ततः गंगया सह भगीरथः समुद्रान्तः पारे पाताललोकं प्राप्तः। सगर पुत्राणां भस्म संस्पृश्य गंगा समुद्रतलपर्यन्तं गता। तदा प्रभृतिः समुद्रः सागरः इत्यपि कथ्यमानः बभूव।


वचनपूर्णान्ते ब्रह्मा भगीरथस्य पुरतः प्रकटतां गतः।
सगरपुत्राः स्वर्गे सन्ति। यावत् गंगा भूलोके प्रवहति तावत् ते सगरपुत्राः स्वर्गलोके वसन्ति।
तव तपसा त्वया गंगा भूलोके आनीता। अतः सा भागीरथी इत्यपि कथ्यमाना भवति। अर्थात् तव पुत्री।
अनन्तरं भगीरथः स्वराज्ये प्रत्यागतवान् महता कुशलतया च राजशासनं कृतवान्।

 SANS. 88

VALMIKI'S RAMAYANA IS BELIEVED TO BE THE FIRST POETIC WORK WRITTEN IN SANSKRIT; IT IS, THEREFORE, REFERRED TO AS THE ADIKAVYA. IT IS SAID THAT BRAHMA ASSURED VALMIKI THAT "AS LONG AS THE MOUNTAINS STAND AND THE RIVERS FLOW, SO LONG SHALL THE RAMAYANA BE READ BY MEN."

THE IMMORTAL EPIC OF VALMIKI NOW IN THE AMAR CHITRA KATHA SERIES



AMAR CHITRA KATHA

96 Pages Rs. 50/-

IBH Distributed by : INDIA BOOK HOUSE

On public demand, the best 50 Amar Chitra Katha titles are now being brought out in Deluxe Editions.



Titles published

501 – Krishna
502 – Hanuman
503 – The sons of Rama
504 – Rama
505 – The Gita
506 – Shiva Parvati
507 – Nala Damayanti
508 – Chanakya
509 – Ganesha
510 – Buddha
511 – Savitri
512 – Tales of Vishnu
513 – Hanuman to the rescue
514 – Tales of Durga
515 – Ganga
516 – Krishna and Rukmini
517 – Vivekananda
518 – Krishna and Jarasandha
519 – Elephanta
520 – Tales of Narada
521 – Angulimala
522 – Krishna and Narakasura
523 – Raman of Tenali
524 – Indra and Shibi
525 – Tales of Arjuna
526 – Mahiravana
527 – Bheema and Hanuman
528 – Kumbhakarna
529 – Kartikeya
530 – Shakuntala
531 – Karna
532 – Sudama
533 – Abhimanyu
534 – Bheeshma
535 – Mirabai
536 – Ashoka
537 – Prahlad
538 – The churning of the ocean
539 – Rani of Jhansi
540 – Panchatantra – Jackal and the War Drum
541 – The Lord of Lanka
542 – Draupadi
543 – Jataka Tales – Monkey stories
544 – Subhas Chandra Bose
545 – Birbal the wise
546 – Vali
547 – Garuda
548 – Rabindranath Tagore
549 – Tales of Shiva
550 – Sati & Shiva

Price Rs. 15 each


AMAR CHITRA KATHA

Did you know

- Over 78 million copies of Amar Chitra Katha have been sold so far?
- A few titles have been brought out in 38 languages of the world?
- 436 titles have been printed so far?


IBH *Published by :* ***India Book House Pvt. Ltd***

Give your child a gift he'll treasure forever




AMAR CHITRA KATHA

AMAR CHITRA KATHA DIGEST



96 colourful pages
Rs. 20





The glorious heritage of India

Available at all leading bookstalls

IBH
Published by:
India Book House Pvt. Ltd.